# मुकुन्दमाला

Exported from ambuda.org on 2025-12-23 06:47:55 UTC

head

श्रीकुलशेखरनृपतिविरचिता मुकुन्दमाला

1

वन्दे मुकुन्दमरविन्ददलायताक्षंकुन्देन्दुशङ्खदशनं शिशुगोपवेषम् ।इन्द्रादिदेवगणवन्दितपादपीठंवृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥

2

जयतु जयतु देवो देवकीनन्दनो ऽयंजयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।जयतु जयतु मेघश्यामलः कोमलाङ्गोजयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ २ ॥

3

मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्तमेकान्तमियन्तमर्थम् ।अविस्मृतिस्त्वच्चरणारविन्दे भवे भवे मेऽस्तु भवत्प्रसादात् ॥ ३ ॥

4

श्रीमुकुन्दपदाम्भोजमधुनः परमाद्भुतम् ।यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ४ ॥

5

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोःकुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।रम्या रामा मृदुतनुलता नन्दने नापि रन्तुंभावे भावे हृदयभवने भावये ऽहं भवन्तम् ॥ ५ ॥

6

नास्था धर्मे न वसुनिचये नैव कामोपभोगेयद्भाव्यं तद्भवतु भगवन्पूर्वकर्मानुरूपम् ।एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरे ऽपित्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ६ ॥

7

दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तके प्रकामम् ।अवधीरितशारदारविन्दौ चरणौ ते मरणे ऽपि चिन्तयामि ॥ ७ ॥

8

सरसिजनयने सशङ्खचक्रे मुरभिदि मा विरमेह चित्त रन्तुम् ।सुखकरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥ ८ ॥

9

मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनानामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणंलोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ९ ॥

10

भवजलधिमगाधं दुस्तरं निस्तरेयंकथमहमिति चेतो मा स्म गाः कातरत्वम् ।सरसिजदृशि देवे तावकी भक्तिरेकानरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १० ॥

11

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमालेदारावर्ते सहजतनयग्राहसंघाकुले च ।संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्पादाम्भोजे वरद भवतो भक्तिनावे प्रसीद ॥ ११ ॥

12

पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुस्तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरादृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ १२ ॥

13

आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहंमेदश्छेदपदानि पूर्तविधयः सर्वे हुतं भस्मनि ।तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ १३ ॥

14

आनन्द गोविन्द मुकुन्द राम नारायणानन्त निरामयेति ।वक्तुं समर्थो ऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ॥ १४ ॥

15

क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये ।भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ १५ ॥

16

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणाद्औदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।सेव्यः श्रीपतिरेव सर्वजगतामेकान्ततः साक्षिणःप्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥ १६ ॥

17

नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसासेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति ।यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदंसेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥ १७ ॥

18

भो लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमांयोगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः ।अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतांयत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम् ॥ १८ ॥

19

बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैःकण्ठेन सवरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना ।नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनामस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ १९ ॥

20

तत्त्वं ब्रुवाणानि परं परस्मादहो क्षरन्तीव सुधां पदानि ।आवर्तय प्राञ्जलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥ २० ॥

21

इदं शरीरं परिणामपेशलं पतत्यवश्यं श्लथसंधि जर्जरम् ।किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब ॥ २१ ॥

22

श्रीमन्नाम प्रोच्य नारायणाख्यं येन प्राप्ता वाञ्छितं पापिनो ऽपि ।हा नः पूर्वं वाक्प्रवृत्ता न तस्मिंस्तेन प्राप्तं गर्भवासादिदुःखम् ॥ २२ ॥

23

मा द्राक्षं क्षीणपुण्यान्क्षणमपि भवतो भक्तिहीनान्पदाब्जेमा श्रौषं श्रव्यबद्धं तव चरितमपास्यान्यदाख्यानजातम् ।मा स्प्राक्षं माधव त्वामपि भुवनपते चेतसापह्नुवानंमा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरे ऽपि ॥ २३ ॥

24

मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि ।हरनयनकृशानुना कृशोऽसि स्मरसि न चक्रपराक्रमं मुरारेः ॥ २४ ॥

25

दारा वाराकरवरसुता ते ऽङ्गजो ऽयं विरिञ्चःस्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।मुक्तिर्मध्ये जगदविकलं तावके देवकी तेमाता मित्त्रं बलरिपुसुतस्तत्त्वतो ऽन्यन्न जाने ॥ २५ ॥

26

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरंपाणिद्वन्द्व समर्चयाच्युतकथां श्रोत्रद्वय त्वं श्रुणु ।कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयंजिघ्र घ्राण मुकुन्दपादतुलसीं मुर्धन्नमाधोक्षजम् ॥ २६ ॥

27

यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभंते नेत्रे तमसोज्झिते सुरुचिरे याभ्यां हरिर्दृश्यते ।सा बुद्धिर्नियमैर्यमैश्च विमला या माधवध्यायिनीसा जिह्वामृतवर्षिणी प्रतिपदं या स्तौति नारायणम् ॥ २७ ॥

28

भक्तद्वेषिभुजंगगारुडमणिस्त्रैलोक्यरक्षामणिर्गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः ।श्रीकान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिःश्रेयो ध्येयशिखाम्णिर्दिशतु नो गोपालचूडामणिः ॥ २८ ॥

29

शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसंपूज्यमन्त्रंसंसारोत्तारमन्त्रं समुदितमनसां सङ्गनिर्याणमन्त्रम् ।सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसंदष्टसंत्राणमन्त्रंजिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ २९ ॥

30

व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधंदैत्यानर्थकरौषधं त्रिजगतां संजीवनैकौषधम् ।भक्तार्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधंश्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम् ॥ ३० ॥

31

आश्चर्यमेतद्धि मनुष्यलोके सुधां परित्यज्य विषं पिबन्ति ।नामानि नारायणगोचराणि त्यक्त्वान्यवाचः कुहकाः पठन्ति ॥ ३१ ॥

32

लाटीनेत्रपुटीपयोधरघटीरेवातटीदुष्कुटीपाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते ।गोविन्देति जनार्दनेति जगतां नाथेति कृष्णेति चव्याहारैः समयस्तदेकमनसां पुंसामतिक्रामति ॥ ३२ ॥

33

अयाच्यमक्रेयमयातयाममपाच्यमक्षय्यमदुर्भरं मे ।अस्त्येव पाथेयमितः प्रयाणे श्रीकृष्णनाममृतभागधेयम् ॥ ३३ ॥

34

यस्य प्रियौ श्रुतधरौ कविलोकगीतौमित्त्रे द्विजन्मपरिवारशिवावभूताम् ।तेनाम्बुजाक्षचरणाम्बुजषट्पदेनराज्ञा कृता स्तुतिरियं कुलशेखरेण ॥ ३४ ॥

इति श्रीकुलशेखरनृपतिविरचिता मुकुन्दमाला समाप्ता ।